# অশ্বত্থস্তোত্রম্

{॥ অশ্বত্থস্তোত্রম্ ॥}

শ্রী নারদ উবাচ

অনায়াসেন লোকোঽয়ম্ সর্বান্ কামানবাপ্নুয়াত্ ।

সর্বদেবাত্মকং চৈকং তন্মে ব্রূহি পিতামহ ॥

ব্রহ্মোবাচ

শ্রুণু দেব মুনেঽশ্বত্থং শুদ্ধং সর্বাত্মকং তরুম্ ।

যৎপ্রদক্ষিণতো লোকঃ সর্বান্ কামান্ সমশ্নুতে ॥

অশ্বত্থাদ্দক্ষিণে রুদ্রঃ পশ্চিমে বিষ্ণুরাস্থিতঃ ।

ব্রহ্মা চোত্তরদেশস্থঃ পূর্বেত্ত্বিন্দ্রাদিদেবতাঃ ॥

স্কন্ধোপস্কন্ধপত্রেষু গোবিপ্রমুনয়স্তথা ।

মূলং বেদাঃ পয়ো যজ্ঞাঃ সংস্থিতা মুনিপুঙ্গব ॥

পূর্বাদিদিক্ষু সংযাতা নদীনদসরোঽব্ধয়ঃ ।

তস্মাত্ সর্বপ্রযত্নেন হ্যশ্বত্থং সংশ্রয়েদ্বুধঃ ॥

ত্বং ক্ষীর্যফলকশ্চৈব শীতলস্য বনস্পতে ।

ত্বামারাধ্য নরো বিন্দ্যাদৈহিকামুষ্মিকং ফলম্ ॥

Stotram Digitalized By Sanskritdocuments.org

চলদ্দলায বৃক্ষায সর্বদাশ্রিতবিষ্ণবে ।

বোধিসত্ত্বায দেবায হ্যশ্বত্থায নমো নমঃ ॥

অশ্বত্থ যস্মাত্ ত্বযি বৃক্ষরাজ নারাযণস্তিষ্ঠতি সর্বকালে ।

অথঃ শ্রুতস্ত্বং সততং তরূণাং ধন্যোঽসি চারিষ্টবিনাশকোঽসি ॥

ক্ষীরদস্ত্বং চ যেনেহ যেন শ্রীস্ত্বাং নিষেবতে ।

সত্যেন তেন বৃক্ষেন্দ্র মামপি শ্রীর্নিষেবতাম্ ॥

একাদশাত্মরুদ্রোঽসি বসুনাথশিরোমণিঃ ।

নারাযণোঽসি দেবানাং বৃক্ষরাজোঽসি পিপ্পল ॥

অগ্নিগর্ভঃ শমীগর্ভো দেবগর্ভঃ প্রজাপতিঃ ।

হিরণ্যগর্ভো ভূগর্ভো যজ্ঞগর্ভো নমোঽস্তু তে ॥

আযুর্বলং যশো বর্চঃ প্রজাঃ পশুবসূনি চ ।

ব্রহ্ম প্রজ্ঞাং চ মেধাং চ ত্বং নো দেহি বনস্পতে ॥

সততং বরুণো রক্ষেত্ ত্বামারাদ্দৃষ্টিরাশ্রযেত্ ।

পরিতস্ত্বাং নিষেবন্তাং তৃণানি সুখমস্তু তে ॥

অক্ষিস্পন্দং ভুজস্পন্দং দুঃস্বপ্নং দুর্বিচিন্তনম্ ।

শত্রূণাং চ সমুত্থানং হ্যশ্বত্থ শময প্রভো ॥

অশ্বত্থায বরেণ্যায সর্বৈশ্বর্য প্রদাযিনে ।
নমো দুঃস্বপ্ননাশায সুস্বপ্নফলদাযিনে ॥

মূলতো ব্রহ্মরূপায মধ্যতো বিষ্ণু রূপিণে ।
অগ্রতঃ শিবরূপায বৃক্ষরাজায তে নমঃ ॥

যং দৃষ্ট্বা মুচ্যতে রোগৈঃ স্পৃষ্ট্বা পাপৈঃ প্রমুচ্যতে ।
যদাশ্রযাচ্চিরঞ্জীবী তমশ্বত্থং নমাম্যহম্ ॥

অশ্বত্থ সুমহাভাগ সুভগ প্রিযদর্শন ।
ইষ্টকামাংশ্চ মে দেহি শত্রুভ্যস্তু পরাভবম্ ॥

আযুঃ প্রজাং ধনং ধান্যং সৌভাগ্যং সর্বসম্পদম্ ।
দেহি দেব মহাবৃক্ষ ত্বামহং শরণং গতঃ ॥

ঋগ্যজুঃসামমন্ত্রাত্মা সর্বরূপী পরাৎপরঃ ।
অশ্বত্থো বেদমূলোঽসাবৃষিভিঃ প্রোচ্যতে সদা ॥

ব্রহ্মহা গুরুহা চৈব দরিদ্রো ব্যাধিপীডিতঃ ।
আবৃত্য লক্ষসংখ্যং তত্ স্তোত্রমেতত্ সুখী ভবেত্ ॥

ব্রহ্মচারী হবিষ্যাশী ত্বদঃশায়ী জিতেন্দ্রিযঃ ।

পপোপহতচিত্তোঽপি ব্রতমেতত্ সমাচরেত্ ॥

একাহস্তং দ্বিহস্তং বা কুর্যাদ্গোমযলেপনম্ ।

অর্চেত্ পুরুষসূক্তেন প্রণবেন বিশেষতঃ ॥

মৌনী প্রদক্ষিণং কুর্যাত্ প্রাগুক্তফলভাগ্ভবেত্ ।

বিষ্ণোর্নামসহস্রেণ হ্যচ্যুতস্যাপি কীর্তনাত্ ॥

পদে পদান্তরং গত্বা করচেষ্টাবিবর্জিতঃ ।

বাচা স্তোত্রং মনো ধ্যানে চতুরঙ্গং প্রদক্ষিণম্ ॥

অশ্বত্থঃ স্থাপিতো যেন তৎকুলং স্থাপিতং ততঃ ।

ধনাযুষাং সমৃদ্ধিস্তু নরকাত্ তারযেত্ পিতৃন্ ॥

অশ্বত্থমূলমাশ্রিত্য শাকান্নোদকদানতঃ ।

একস্মিন্ ভোজিতে বিপ্রে কোটিব্রাহ্মণভোজনম্ ॥

অশ্বত্থমূলমাশ্রিত্য জপহোমসুরার্চনাত্ ।

অক্ষযং ফলমাপ্নোতি ব্রহ্মণো বচনং যথা ॥

এবমাশ্বাসিতোঽশ্বত্থঃ সদাশ্বাসায কল্পতে ।

যজ্ঞার্থং ছেদিতেঽশ্বত্থে হ্যক্ষযং স্বর্গমাপ্নুযাত্ ॥

ছিন্নো যেন বৃথাঽশ্বত্থশ্ছেদিতা পিতৃদেবতাঃ ।

অশ্বত্থঃ পূজিতো যত্র পূজিতাঃ সর্বদেবতাঃ ॥

॥ ইতি অশ্বত্থ স্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by Anuradha AnurAdha at cs.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Ashvattha Stotram Lyrics in Bengali PDF
% File name : ashvatthastotram.itx
% Location : doc_deities_misc
% Author : traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion ??
% Transliterated by : Anuradha Anuraadha at cs.com
% Proofread by : Anuradha Anuraadha at cs.com
% Latest update : February 6, 2003
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 15, 2015 ] at Stotram Website